## उपसर्गे घोः किः। (९२/३२७०)

भावे अकर्तरि [1]च कारके इति वर्तते। उपसर्गे उपपदे घुसञ्ज्ञकेभ्यः धातुभ्यः [2]किः प्रत्ययो भवति। कित्करणम् [3]आतो लोपार्थम् (६.४.६४/२३७२)। प्रदिः। प्रधिः। अन्तर्धिः[4]॥

## कर्मण्यधिकरणे च। (९३/३२७१)

घोः इत्येव[5]। कर्मण्युपपदे घुसञ्ज्ञकेभ्यो धातुभ्यः किः प्रत्ययो भवति अधिकरणे कारके। [6]जलं धीयते अस्मिन् इति जलधिः। शरधिः[7]। अधिकरणग्रहणमर्थान्तरनिरासार्थम्। चकारः [8]प्रत्ययानुकर्षणार्थः॥

## स्त्रियां क्तिन्। (९४/३२७२)

भावे अकर्तरि च कारके इति वर्तते। स्त्रीलिङ्गे भावादौ[9] धातोः क्तिन् प्रत्ययो भवति। घञजपामपवादः। कृतिः। [10]चितिः। [11]मतिः।

[३०७] क्तिन्नाबादिभ्यश्च वक्तव्यः। (म. भा. २. १५१)

आबादयः प्रयोगतोऽनुसर्तव्याः। आप्तिः। [12]राद्धिः। दीप्तिः। [13]स्रस्तिः। ध्वस्तिः। लब्धिः।

[३०८] श्रुयजिस्तुभ्यः करणे। (म. भा. २. १५१)

श्रूयते अनया [14]इति श्रुतिः। इष्टिः। स्तुतिः।

[३०९] ग्लाम्लाज्याहाभ्यो निः। (म. भा. २. १५२)

ग्लानिः। [15]म्लानिः। ज्यानिः। हानिः।

[३१०] ॠकारल्वादिभ्यः क्तिन् निष्ठावद् भवतीति वक्तव्यम्। (म.भा. २. १५२)

कीर्णिः। गीर्णिः। [16]जीर्णिः। [17]शीर्णिः। लूनिः। [18]यूनिः।

[३११] सम्पदादिभ्यः क्विप्[19]। (म. भा. २.१५२)

सम्पद्। विपद्। प्रतिपद्।

[३१२] क्तिन्नपीष्यते।

सम्पत्तिः। विपत्तिः[20]॥

---

1. च नास्ति फ. 2. किन् प्रत्ययः ह. 3. आतो लोप इटि च इत्यर्थम् इ.फ.ग.ह. 4. विधिः सन्धि इत्यधिकम् अ. क. फ. ह, अन्तर्धिः नास्ति फ. ह, विधिः निधिः ड. 5. अनुवर्तते इत्यधिकम् फ, घोः किः: इत्येव ब. 6. जलानि धीयन्ते फ. 7. उदधिः इषुधिः इत्यधिकम् फ, वालधिः इत्यधिकम् ब. क. ड. ह. 8. कि-प्रत्यया° अ, प्रत्ययान्तरानुकर्षणार्थः ह. 9. अकर्तरि च कारके इत्यधिकम् फ. 10. भृतिः फ, पूतिः क, वृतिः सृतिः नीतिः ह. 11. स्तुतिः अ. 12. राद्धिः नास्ति अ. 13. स्वस्तिः अ. ब. ग. 14. इति नास्ति फ. 15. म्लानिः नास्ति ड. 16. नास्ति अ. ड. फ. 17. नास्ति अ. ड. फ. 18. पूनिः ब. फ. ह, पूतिः ड. 19. वक्तव्यः इत्यधिकम् ह. 20. प्रतिपत्तिः इत्यधिकम् अ. ड. ग. फ, आपत्तिः इत्यधिकम् ह.